॥महन्यासम्॥

॥पञ्चाङ्गरुद्र न्यासः॥

अथ पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाऽभिषेकविधिं व्याख्यास्यामः॥

नमस्ते रुद्र मन्यव उतोत इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥
या त इषु शिशवतमा शिवं बभूव ते धनुः।
शिवा शरव्या या तव तया नो रुद्र मृडय॥
कं खं गं घं ङं।
य र ल व श ष स होम्॥
ओं नमो भगवते रुद्राय॥
पूर्वाङ्ग रुद्राय नमः॥1॥

अपैतु मृत्युरमृतन्न आगन् वैवस्वतो नो अभयं कृणोतु।
पर्णं वनस्पतेरिवाभि नश्शीयताग्ं रयिस्सचतां नश्शचीपतिः॥
चं छं जं झं ञं।
य र ल व श ष स होम्॥
ओं नमो भगवते रुद्राय॥
दक्षिणाङ्ग रुद्राय नमः॥2॥

निधनपतये नमः॥ निधनपतान्तिकाय नमः॥

ऊर्ध्वाय नमः॥ ऊर्ध्वलिङ्गाय नमः॥

हिरण्याय नमः॥ हिरण्यलिङ्गाय नमः॥

सुवर्णाय नमः॥ सुवर्णलिङ्गाय नमः॥

दिव्याय नमः॥ दिव्यलिङ्गाय नमः॥

भवाय नमः॥ भवलिङ्गाय नमः॥

शर्वाय नमः॥ शर्वलिङ्गाय नमः॥

शिवाय नमः॥ शिवलिङ्गाय नमः॥

ज्वलाय नमः॥ ज्वललिङ्गाय नमः॥

आत्माय नमः॥ आत्मलिङ्गाय नमः॥

परमाय नमः॥ परमलिङ्गाय नमः॥

एतथ्सोमस्य सूर्यस्य सर्वलिङ्गग्ं स्थापयति पाणिमन्त्रं पवित्रम्॥

टं ठं डं ढं णं।

य र ल व श ष स होम्॥

ओं नमो भगवते रुद्राय॥

पश्चिमाङ्ग रुद्राय नमः॥3॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु॥

तं थं दं धं नं।

य र ल व श ष स होम्॥

ओं नमो भगवते रुद्राय॥

उत्तराङ्ग रुद्राय नमः॥4॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः।

तेनान्नेनाप्यायस्व।

नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥

पं फं बं भं मं।

य र ल व श ष स होम्॥

ओं नमो भगवते रुद्राय॥

ऊर्ध्वाङ्ग रुद्राय नमः॥5॥

॥पञ्चमुख न्यासः॥

तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥

संवर्ताग्नि तटित्प्रदीप्त कनक प्रस्पर्धि तेजोरुणं
गंभीरध्वनि सामवेद जनकं ताम्राधरं सुन्दरम्।
अर्धेन्दुद्युति लोलपिङ्गल जटा भार प्रबद्धोदकं
वन्दे सिद्ध सुरासुरेन्द्र नमितं पूर्वं मुखं शूलिनः॥

ओं नमो भगवते रुद्राय॥
पूर्वाङ्ग मुखाय नमः॥1॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यस्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥

कालाभ्र भ्रमराञ्जन द्युतिनिभं व्यावृत्त पिङ्गेक्षणं
कर्णोद्भासित भोगिमस्तकमणि प्रोद्भिन्न दंष्ट्राङ्कुरम्।
सर्प प्रोत कपाल शुक्ति शकल व्याकीर्णताशेखरं
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम्॥

ओं नमो भगवते रुद्राय॥
दक्षिणाङ्ग मुखाय नमः॥2॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवेभवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥

प्रालेयाचल मिन्दुकुन्द धवळं गोक्षीर फेनप्रभं
भस्माभ्यङ्ग मनङ्ग देह दहन ज्वालावली लोचनम्।
विष्णु-ब्रह्म मरुद्गणार्चित-पदं ऋग्वेद-नादोदयं
वन्देऽहं सकलं कलङ्क-रहितं स्थाणोर्-मुखं पश्चिमम्॥

ओं नमो भगवते रुद्राय॥
पश्चिमाङ्ग मुखाय नमः॥3॥

वामदेवाय नमो ज्येष्ठाय नमश्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥

गौरं कुङ्कुम पङ्कितं सुतिलकं व्यापाण्डु मण्डस्थलं
भ्रूविक्षेप कटाक्ष वीक्षण लसत्संसक्त कर्णोत्फलम्।
स्निग्धं बिंब फलाधरं प्रहसितं नीलालकालङ्कृतं
वन्दे याजुष-वेदघोष-जनकं वक्त्रं हरस्योत्तरम्॥

ओं नमो भगवते रुद्राय॥
उत्तराङ्ग मुखाय नमः॥4॥

ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपति–र्ब्रह्मणोऽधिपति–र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

व्यक्ताव्यक्त निरूपितं च परमं षट्त्रिंश तत्वाधिकं
तस्मादुत्तर तत्त्वमक्षरमिति ध्येयं सदा योगिभिः।
ओं कारादि समस्त मन्त्र जनकं सूक्ष्माति सूक्ष्मं परं
वन्दे पञ्चम–मीश्वरस्य वदनं खं–व्यापि तेजोमयम्॥

ओं नमो भगवते रुद्राय॥
ऊर्ध्वाङ्ग मुखाय नमः॥

॥1. केशादि पादान्तन्यासः॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि॥
शिखायै नमः॥1॥

अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥
शिरसे नमः॥2॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥
ललाटाय नमः॥3॥

हग्ं स श्शुचिषद्–वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥
भ्रुवोर्मध्याय नमः॥4॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥
नेत्राभ्यां नमः॥5॥

नम स्स्रुत्याय च पथ्याय च नमः काव्याय च नीप्याय च नम स्सूद्याय च सरस्याय च नमो नाद्याय च

वैशन्ताय च॥

कर्णाभ्यां नमः॥6॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते॥

नासिकाभ्यां नमः॥7॥

अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो न स्सुमना भव॥

मुखाय नमः॥8॥

नीलग्रीवा श्शितिकण्ठा श्शर्वा अधः क्षमाचराः।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥

कण्ठाय नमः॥9॥

नीलग्रीवा श्शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥

उपकण्ठाय नमः॥10॥

नमस्ते अस्त्वायुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥

बाहुभ्यां नमः॥11॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज॥
उपबाहुभ्यां नमः॥12॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥
मणिबन्धाभ्यां नमः॥13॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥
हस्ताभ्यां नमः॥14॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवेभवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥
अङ्गुष्ठाभ्यां नमः॥15॥

वामदेवाय नमो ज्येष्ठाय नमश्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो
बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥
तर्जनीभ्यां नमः॥16॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यस्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥
मध्यमाभ्यां नमः॥17॥

तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥
अनामिकाभ्यां नमः॥18॥

ईशान–स्सर्वविद्यानामीश्वर–स्सर्वभूतानां ब्रह्माधिपति–र्ब्रह्मणोऽधिपति–र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥
कनिष्ठिकाभ्यां नमः॥19॥

[नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः॥
करतलकरपृष्ठाभ्यां नमः॥ इति अधिकपाठः क्वचित्॥]

नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यः॥
हृदयाय नमः॥20॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमः॥
पृष्ठाय नमः॥21॥

नम स्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः॥
कक्षाभ्यां नमः॥22॥

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमः॥
पार्श्वाभ्यां नमः॥23॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः।
जठराय नमः॥24॥

हिरण्यगर्भ स्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
नाभ्यै नमः॥25॥

मीढुष्टम शिवतम शिवो न स्सुमना भव।
परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि॥
कव्यै नमः॥26॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥
गुह्याय नमः॥27॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥
अण्डाभ्यां नमः॥28॥

स शिरा जातवेदा अक्षरं परमं पदम्।
वेदानाग्ं शिरसि माता आयुष्मन्तं करोतु माम्।
अपानाय नमः॥29॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥
ऊरुभ्यां नमः॥30॥

एष ते रुद्र भागस्तं जुषस्व तेनाऽवसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥
जानुभ्यां नमः॥31॥

सग्ंसृष्टजित् सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता।
बृहस्पते परि दीयारथेन रक्षोहाऽमित्राग्ं अपबाधमानः॥
जङ्घाभ्यां नमः॥32॥

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानञ्च यत्।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥
गुल्फाभ्यां नमः॥33॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥
पादाभ्यां नमः॥34॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहीग्ंश्च सर्वाञ्जम्भयन्थ्सर्वाश्च यातुधान्यः॥
कवचाय हुम्॥35॥

नमो बिल्मिने च कवचिने च नम श्श्रुताय च श्रुतसेनाय च॥
उपकवचाय हुम्॥36॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः॥
नेत्रत्रयाय वौषट्॥37॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप॥
अस्त्राय फट्॥38॥

य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे।
तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि॥
इति दिग्बन्धः॥

॥2. दशाङ्ग न्यासः॥

(ओं नमो भगवते रुद्रायेति नमस्कारान् न्यसेत्॥)

ओं मूर्ध्ने नमः॥

नं नासिकाय नमः॥

मों ललाटाय नमः॥

भं मुखाय नमः॥

गं कण्ठाय नमः॥

वं हृदयाय नमः॥

तें दक्षिण–हस्ताय नमः॥

रुं वाम–हस्ताय नमः॥

द्रां नाभ्यै नमः॥

यं पादाभ्यां नमः॥

॥3. पञ्चाङ्गन्यासः॥

(पादादि मूर्धान्त पञ्चाङ्गन्यासः)

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवेभवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥
पादाभ्यां नमः॥1॥

वामदेवाय नमो ज्येष्ठाय नमश्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः।
ऊरुभ्यां नमः॥2॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यस्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥
हृदयाय नमः॥3॥

तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥
मुखाय नमः॥4॥

ईशान–स्सर्वविद्यानामीश्वर–स्सर्वभूतानां ब्रह्माधिपति–र्ब्रह्मणोऽधिपति–र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥
(हंस हंस) मूर्ध्ने नमः॥5॥

॥4. हंस गायत्री॥

अस्य श्री हंस गायत्री स्तोत्र महा मन्त्रस्य। अव्यक्त परब्रह्म ऋषिः। अव्यक्त गायत्री छन्दः। परमहंसो देवता। हंसां – बीजम्, हंसीं – शक्तिः, हंसूं – कीलकम्॥ परम हंस – प्रसाद सिद्ध्यर्थे *[हंस गायत्री]* जपे विनियोगः॥

हंसां अङ्गुष्ठाभ्यां नमः॥
हंसीं तर्जनीभ्यां नमः॥
हंसूं मध्यमाभ्यां नमः॥
हंसैं अनामिकाभ्यां नमः॥
हंसौं कनिष्ठिकाभ्यां नमः॥
हंसः करतलकरपृष्ठाभ्यां नमः॥

हंसां हृदयाय नमः॥
हंसीं शिरसे स्वाहा॥
हंसूं शिखायै वषट्॥
हंसैं कवचाय हुम्॥
हंसौं नेत्रत्रयाय वौषट्॥
हंसः अस्त्राय फट्॥
भूर्भुवस्सुवरोमिति दिग्भन्धः॥

॥ध्यानम्॥

गमागमस्थं गमनादि शून्यं चिद्रूपदीपं तिमिरापहारम्।
पश्यामि ते सर्व जनान्तरस्थं नमामि हंसं परमात्मरूपम्॥

देहो देवालयः प्रोक्तो जीवो देवस्सनातनः।
त्यजे दज्ञान निर्माल्यं सोऽहं भावेन पूजयेत्॥

हंसो हंस परमहंसः। हंस सोऽहं सोऽहं हंसः॥

हंस हंसाय विद्महे परमहंसाय धीमहि।
तन्नो हंसः प्रचोदयात्॥

हंस हंसेति यो ब्रूयाद्धंसो नाम सदाशिवः।
एवं न्यासविधिं कृत्वा तत स्संपुटमारभेत्॥

॥5. दिक् संपुट न्यासः॥

ओं भूर्भुवस्सुवरों – लं –

त्रातारमिन्द्र मवितारमिन्द्रग्ं हवेहवे सुहवग्ं शूरमिन्द्रम्।

हुवेनुशक्रं पुरुहूतमिन्द्रग्ग् स्वस्तिनो मघवा धात्विन्द्रः॥

लं – भूर्भुवस्सुवः – इन्द्राय वज्रहस्ताय सुराधिपतय ऐरावतवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

पूर्वदिग्भागे ललाटस्थाने इन्द्र स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – रं –

त्वन्नो अग्ने वरुणस्यविद्वान् देवस्य हेडोऽवया सिसीष्ठाः।

यजिष्ठो वह्नि तमश्शोशुचानो विश्वाद्वेषाग्ंसि प्रमुमुग्ध्यस्मत्॥

रं – भूर्भुवस्सुवः – अग्नये शक्ति हस्ताय तेजोऽधिपतये अजवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

आग्नेयदिग्भागे नेत्रस्थाने अग्नि स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – हं –

सुगन्नः पन्थामभयं कृणोतु।

यस्मिन् नक्षत्रे यम एति राजा।

यस्मिन्नेन मभ्यषिञ्चन्त देवाः।

तदस्य चित्रग्ं हविषा यजाम॥

हं – भूर्भुवस्सुवः – यमाय दण्डहस्ताय धर्माधिपतये महिषवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

दक्षिण दिग्भागे कर्णस्थाने यम स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – षं –

असुन्वन्तमयजमानमिच्छस्तेन स्येत्यां तस्करस्यान्वेषि।

अन्यमस्मदिच्छ सात इत्या नमो देवि निर्‌ऋते तुभ्यमस्तु॥

षं – भूर्भुवस्सुवः – निर्‌ऋतये खड्गहस्ताय रक्षोधिपतये नरवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

नैर्‌ऋति दिग्भागे मुखस्थाने निर्‌ऋति सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – वं –

तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।

अहेडमानो वरुणेह बोध्युरुशग्ं समान आयुः प्रमोषीः॥

वं – भूर्भुवस्सुवः – वरुणाय पाशहस्ताय जलाधिपतये मकरवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

पश्चिम दिग्भागे बाहुस्थाने वरुण स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – यं –

आनो नियुद्भि श्शति नीभिरध्वरम्।

सहस्रिणीभिरुप याहि यज्ञम्।

वायो अस्मिन्हविषिमादयस्व।

यूयं पात स्स्वस्तिभि स्सदानः॥

यं – भूर्भुवस्सुवः – वायवे साङ्कुशध्वजहस्ताय प्राणाधिपतये मृगवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

वायव्य दिग्भागे नाशिकास्थाने वायु स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – सं –

वयगं सोमव्रते तव।

मनस्तनूषु बिभ्रतः।

प्रजावन्तो अशीमहि॥

सं – भूर्भुवस्सुवः – सोमाय अमृतकलशहस्ताय नक्षत्राधिपतये अश्ववाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

उत्तर दिग्भागे हृदयस्थाने सोम स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – शं –

तमीशानं जगत स्तस्थुषस्पतिम्।

धियं जिन्वमवसे हूमहे वयम्।

पूषानो यथा वेदसामसद्वृधे।

रक्षितापायुरदब्ध स्स्वस्तये॥

शं – भूर्भुवस्सुवः – ईशानाय त्रिशूलहस्ताय विद्याधिपतये वृषभवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

ईशान दिग्भागे नाभिस्थाने ईशान स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – खं –

अस्मै रुद्रामेहना पर्वतासो वृत्रहत्ये भरहूतो सजोषाः।

यश्शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्मां अवन्तु देवाः।

खं – भूर्भुवस्सुवः – ब्रह्मणे पद्महस्ताय लोकाधिपतये हंसवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय

सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

ऊर्ध्व दिग्भागे मूर्धस्थाने ब्रह्मा सुप्रीतो सुप्रसन्नो वरदो भवतु॥

ओं भूर्भुवस्सुवरों – ह्रीं –

स्योना पृथिवि भवानृक्षरा निवेशनी।

यच्छानश्शर्म सप्रथाः।

ह्रीं – भूर्भुवस्सुवः – विष्णवे चक्रहस्ताय नागाधिपतये गरुडवाहनाय साङ्गाय सायुधाय सशक्तिपरिवाराय

सर्वालङ्कारभूषिताय उमामहेश्वर पार्षदाय नमः॥

अधो दिग्भागे पादस्थाने विष्णु स्सुप्रीतो सुप्रसन्नो वरदो भवतु॥

॥6. शोडशाङ्ग रौद्रीकरणम्॥

ओं भूर्भुवस्सुवः॥ ओं अम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
विभूरसि प्रवाहणो रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
अं ओं भूर्भुवस्सुवरोम्॥ शिखास्थाने रुद्राय नमः॥1॥

ओं भूर्भुवस्सुवः॥ ओं आम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
वह्निरसि हव्य वाहनो रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
आं ओं भूर्भुवस्सुवरोम्॥ शिरस्थाने रुद्राय नमः॥2॥

ओं भूर्भुवस्सुवः॥ ओं इम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
श्वात्रोऽसि प्रचेता रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
इं ओं भूर्भुवस्सुवरोम्॥ मूर्धस्थाने रुद्राय नमः॥3॥

ओं भूर्भुवस्सुवः॥ ओं ईम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
तुथोऽसि विश्ववेदा रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
ईं ओं भूर्भुवस्सुवरोम्॥ ललाटस्थाने रुद्राय नमः॥4॥

ओं भूर्भुवस्सुवः॥ ओं उम्॥

नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
उशिगसि कवी रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
उं ओं भूर्भुवस्सुवरोम्॥ भ्रूस्थाने रुद्राय नमः॥5॥

ओं भूर्भुवस्सुवः॥ ओं ऊम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
अङ्घारसि बंभारी रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
ऊं ओं भूर्भुवस्सुवरोम्॥ मुखस्थाने रुद्राय नमः॥6॥

ओं भूर्भुवस्सुवः॥ ओं ऋम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
अवस्युरसि दुवस्वान् रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
ऋं ओं भूर्भुवस्सुवरोम्॥ कण्ठस्थाने रुद्राय नमः॥7॥

ओं भूर्भुवस्सुवः॥ ओं ॠम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
ॠं ओं भूर्भुवस्सुवरोम्॥ बाहुस्थाने रुद्राय नमः॥8॥

ओं भूर्भुवस्सुवः॥ ओं ऌम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
संम्राडसि कृशानू रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
ऌं ओं भूर्भुवस्सुवरोम्॥ ऊरुस्थाने रुद्राय नमः॥9॥

ओं भूर्भुवस्सुवः॥ ओं लृम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
परिषद्योसि पवमानो रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
लृं ओं भूर्भुवस्सुवरोम्॥ हृदयस्थाने रुद्राय नमः॥10॥

ओं भूर्भुवस्सुवः॥ ओं एम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
प्रतक्वासि नभस्वान् रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
एं ओं भूर्भुवस्सुवरोम्॥ नाभिस्थाने रुद्राय नमः॥11॥

ओं भूर्भुवस्सुवः॥ ओं ऐम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
असं मृष्टोऽसि हव्यसूदो रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
ऐं ओं भूर्भुवस्सुवरोम्॥ कटिस्थाने रुद्राय नमः॥12॥

ओं भूर्भुवस्सुवः॥ ओं ओम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
ऋतधामासि सुवर्ज्योती रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
ओं ओं भूर्भुवस्सुवरोम्॥ ऊरुस्थाने रुद्राय नमः॥13॥

ओं भूर्भुवस्सुवः॥ ओं औम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥

ब्रह्म ज्योतिरसि सुवर्धामा रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
औं ओं भूर्भुवस्सुवरोम्॥ जानुस्थाने रुद्राय नमः॥14॥

ओं भूर्भुवस्सुवः॥ ओं अम्॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
अजोऽस्येक पाद्रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
अं ओं भूर्भुवस्सुवरोम्॥ जङ्घास्थाने रुद्राय नमः॥15॥

ओं भूर्भुवस्सुवः॥ ओं अः॥
नमश्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च॥
अहिरसि बुध्नियो रौद्रेणानीकेन पाहिमाग्ने पिपृहिमा मामा हिग्ं सीः॥
अः ओं भूर्भुवस्सुवरोम्॥ पादस्थाने रुद्राय नमः॥16॥

त्वगस्थिगतै स्सर्वपापैः प्रमुच्यते। सर्वभूतेष्व पराजितो भवति।

ततो भूत प्रेत पिशाच ब्रह्म राक्षस यक्ष यमदूत शाकिनी ढाकिनी सर्प श्वापद वृश्चिक तस्करा द्युपद्रवा द्युपघाताः।

सर्वे ज्वलन्तं पश्यन्तु। मां रक्षन्तु॥ *[यजमानं सह कुटुंबं रक्षन्तु, सर्वेषां भक्त महा जनानां सह कुटुंबानां रक्षन्तु॥]*

॥7. गुह्यादि – मस्तकान्तं षडङ्गन्यासः॥

मनो ज्योतिर्जुषता माज्यंविच्छिन्नं यज्ञग्ं समिमन्दधातु।
या इष्टा उषसो निमृचश्च तास्सन्दधामि हविषा घृतेन॥
गुह्याय नमः॥1॥

अबोध्यग्नि स्समिधा जनानां प्रतिधेनुमिवायतीमुषासम्।
यह्वा इव प्रवया मुज्जिहानाः प्रभानवस्सिस्रते नाकमच्छ॥
नाभ्यै नमः॥2॥

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपाग्ंरेताग्ंसि जिन्वति॥
हृदयाय नमः॥3॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानर मृताय जातमग्निम्।
कविग्ं सम्राजमतिथिञ्जनाना मासन्ना पात्रञ्जनयन्त देवाः॥
कण्ठाय नमः॥4॥

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिऽवस्ताम्।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः॥
मुखाय नमः॥5॥

जातवेदा यदि वा पावकोऽसि।

वैश्वानरो यदि वा वैद्युतोसि।
शं प्रजाभ्यो यजमानाय लोकम्।
ऊर्जं पुष्टिन्ददद्भ्याव वृथ्स्व॥
शिरसे नमः॥6॥

॥8. आत्मरक्षाः॥

ब्रह्मात्मन्वदसृजत। तदकामयत। समात्मना पद्येयेति। आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै दशमग्ं हूतः प्रत्यशृणोत्। स दशहूतोऽभवत्। दशहूतो ह वै नामैषः। तं वा एतं दशहूतग्ं सन्तम्। दशहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥[1]

आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै सप्तमग्ं हूतः प्रत्यशृणोत्। स सप्तहूतोऽभवत्। सप्तहूतो ह वै नामैषः। तं वा एतग्ं सप्तहूतग्ं सन्तम्। सप्तहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै षष्ठग्ं हूतः प्रत्यशृणोत्। स षड्ढूतोऽभवत्॥[2]

षड्ढूतो ह वै नामैषः। तं वा एतग्ं षड्ढूतग्ं सन्तम्। षड्ढोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै पञ्चमग्ं हूतः प्रत्यशृणोत्। स पञ्चहूतोऽभवत्। पञ्चहूतो ह वै नामैषः। तं वा एतं पञ्चहूतग्ं सन्तम्। पञ्चहोतेत्याचक्षते परोक्षेण॥[3]

परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन् नित्यामन्त्रयत। तस्मै चतुर्थग्ं हूतः प्रत्यशृणोत्। स चतुर्हूतोऽभवत्। चतुर्हूतो ह वै नामैषः। तं वा एतं चतुर्हूतग्ं सन्तम्। चतुर्होतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। तमब्रवीत्। त्वं वै मे नेदिष्ठग्ं हूतः प्रत्यश्रौषीः। त्वयैनानाख्यातार इति। तस्मान्नु हैनाग्श्चतुर्होतार इत्याचक्षते। तस्माच्छुश्रूषुः पुत्राणाग्ं हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। य एवं वेद॥[4]

आत्मने नमः॥

॥9. शिवसङ्कल्पः॥

येनेदं भूतं भुवनं भविष्यत्-परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥1॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारु यन्ति।
यत् सम्मित-मनुसंयन्ति प्राणिनः तन्मे मनः शिवसङ्कल्पमस्तु॥2॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्ष्ममन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥3॥

यत्-प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥4॥

सुषारथिरश्वानिव यन्मनुष्यान्ने नीयतेऽभीशुभिर्वाजिन इव।
हृत्-प्रतिष्ठं यद्-अजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥5॥

यस्मिन्नृचस्सामयजूग्ंषि यस्मिन् प्रतिष्ठा रथनाभाविवाराः।
यस्मिग्ंश्चित्तग्ं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥6॥

यदत्र षष्ठं त्रिशतग्ं सुवीरं यज्ञस्य गुह्यं नवनावमाय्यम्।
दश पञ्च त्रिग्ं शतं यत्परञ्च तन्मे मनः शिवसङ्कल्पमस्तु॥7॥

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥8॥

येनेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः।
तदेवाग्नि स्तमसो ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥9॥

येन द्यौः पृथिवी चान्तरिक्षञ्च ये पर्वताः प्रदिशो दिशश्च।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥10॥

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः।
ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिवसङ्कल्पमस्तु॥11॥

अचिन्त्यं चाप्रमेयञ्च व्यक्ताव्यक्तं परञ्च यत्।
सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु॥12॥

एका च दश शतं च सहस्रं चायुतं च नियुतं च प्रयुतं चार्बुदं च
न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च तन्मे मनः शिवसङ्कल्पमस्तु॥13॥

ये पञ्च पञ्चादश शतग्ं सहस्रमयुतं न्यर्बुदं च।
ते अग्निचित्येष्टकास्तग्ं शरीरं तन्मे मनः शिवसङ्कल्पमस्तु॥14॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
यस्य योनिं परिपश्यन्ति धीरास्तन्मे मनः शिवसङ्कल्पमस्तु॥15॥

यस्येदं धीराः पुनन्ति कवयो ब्रह्माणमेतं त्वा वृणत इन्दुम्।
स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः शिवसङ्कल्पमस्तु॥16॥

परात्परतरं चैव यत् पराच्चैव यत्परम्।
यत् परात् परतो ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु॥17॥

परात्परतरो ब्रह्मा तत् परात्परतो हरिः।
तत् परात् परतोऽधीशः तन्मे मनः शिवसङ्कल्पमस्तु॥18॥

या वेदादिषु गायत्री सर्वव्यापी महेश्वरी।
ऋग्यजुस्सामाथर्वैश्च तन्मे मनः शिवसङ्कल्पमस्तु॥19॥

यो वै देवं महादेवं प्रणवं परमेश्वरम्।
यस्सर्वे सर्व वेदैश्च तन्मे मनः शिवसङ्कल्पमस्तु॥20॥

प्रयुतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम्।
ओं कारं प्रणवात्मानं तन्मे मनः शिवसङ्कल्पमस्तु॥21॥

योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः।
अकायो निर्गुणो ह्यात्मा तन्मे मनः शिवसङ्कल्पमस्तु॥22॥

गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च।

प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसङ्कल्पमस्तु॥23॥

कैलासशिखरे रम्ये शङ्करस्य शिवालये।
देवतास्तत्र मोदन्ते तन्मे मनः शिवसङ्कल्पमस्तु॥24॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् तन्मे मनः शिवसङ्कल्पमस्तु॥25॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्।
सं बाहुभ्यां नमति सं पतत्रैर् द्यावापृथिवी जनयन्देव एकस्तन्मे मनः शिवसङ्कल्पमस्तु॥26॥

चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः।
इतिहासपुराणानां तन्मे मनः शिवसङ्कल्पमस्तु॥27॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषस्तन्मे मनः शिवसङ्कल्पमस्तु॥28॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते तन्मे मनः शिवसङ्कल्पमस्तु॥29॥

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमस्तन्मे मनः शिवसङ्कल्पमस्तु॥30॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शन्तमग्ं हृदे।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु॥31॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः।
स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवस्तन्मे मनः शिवसङ्कल्पमस्तु॥32॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु॥33॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु॥34॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु
यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु॥35॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीग्ं सर्वभूतानां तामिहोपह्वये श्रियं तन्मे मनः शिवसङ्कल्पमस्तु॥36॥

य इदग्ं शिवसङ्कल्पग्ं सदाध्यायन्ति ब्राह्मणाः।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसङ्कल्पमस्तु॥37॥

हृदयाय नमः॥

॥10. पुरुषसूक्तम्॥

सहस्रशीर्षा पुरुषः। सहस्राक्षस्सहस्रपात्।
स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्॥

पुरुष एवेदग्ं सर्वम्। यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानः। यदन्नेनातिरोहति॥

एतावानस्य महिमा। अतो ज्यायाग्ंश्च पूरुषः।
पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि॥

त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः।
ततो विश्वङ्व्यक्रामत्। साशनानशने अभि॥

तस्माद्विराडजायत। विराजो अधि पूरुषः।
स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः॥

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः॥

सप्तास्यासन्परिधयः। त्रिस्सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वानाः। अबध्नन् पुरुषं पशुम्॥

तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः।
तेन देवा अयजन्त। साध्या ऋषयश्च ये॥

तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्।
पशूग्ंस्ताग्ंश्चक्रे वायव्यान्। आरण्यान् ग्राम्याश्च ये॥

तस्माद्यज्ञात्सर्वहुतः। ऋचस्सामानि जज्ञिरे।
छन्दाग्ंसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत॥

तस्मादश्वा अजायन्त। ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः॥

यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते॥

ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः। पद्भ्याग्ं शूद्रो अजायत॥

चन्द्रमा मनसो जातः। चक्षोस्सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत॥

नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौस्समवर्तत।
पद्भ्यां भूमिर्दिशश्श्रोत्रात्। तथा लोकाग्ं अकल्पयन्॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे।
सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते॥

धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान् प्रदिशश्चतस्रः।
तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते॥

यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानस्सचन्ते। यत्र पूर्वे साध्यास्सन्ति देवाः॥

शिरसे स्वाहा॥

॥11. उत्तरनारायणम्॥

अद्भ्यस्संभूतः पृथिव्यै रसाच्च। विश्वकर्मणस्समवर्तताधि।
तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे॥

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्।
तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय॥

प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते।
तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः॥

यो देवेभ्य आतपति। यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये॥

रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्न्।
यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे॥

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे।
नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्॥

इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥

शिखायै वषट्॥

॥12. अप्रतिरथम्॥

आशु शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम्।
सङ्क्रन्दनोऽनिमिष एकवीर श्शतग्ं सेना अजयथ्साकमिन्द्रः॥

सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।
तदिन्द्रेण जयत तथ्सहध्वं युधो नर इषुहस्तेन वृष्णा॥

स इषुहस्तै स्स निषङ्गिभिर्वशीसग्ं स्रष्टा स युध इन्द्रो गणेन।
सग्ंसृष्टजिथ्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता॥

बृहस्पते परि दीयारथेन रक्षोहाऽमित्राग्ं अपबाधमानः।
प्रभञ्जन्थ्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा।
इमग्ं सजाता अनु वीरयध्वमिन्द्रग्ं सखायोऽनुसग्ं रभध्वम्॥

बलविज्ञाय स्स्थविरः प्रवीर स्सहस्वान् वाजी सहमान उग्रः।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्॥

अभिगोत्राणि सहसा गाहमानोऽदायो वीर श्शतमन्युरिन्द्रः।
दुश्च्यवनः पृतनाषाडयुद्ध्योऽस्माकग्ं सेना अवतु प्र युथ्सु॥

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताग्ं शर्ध उग्रम्।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्॥

अस्माकमिन्द्र स्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु।
अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु॥

उद्धर्षय मघवन्नायुधान्युथ्सत्वनां मामकानां महाग्ंसि।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः॥

उप प्रेत जयता नर स्स्थिरा व स्सन्तु बाहवः।
इन्द्रो व श्शर्म यच्छत्वनाधृष्या यथाऽसथ॥

अवसृष्टा परा पत शरव्ये ब्रह्मसग्ंशिता।
गच्छामित्रान् प्रविश मैषां कं चनोच्छिषः॥

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिऽवस्ताम्।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः॥

यत्र बाणा स्सम्पतन्ति कुमारा विशिखा इव।
इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु॥

कवचाय हुम्॥

॥13. प्रतिपूरुषमित्यनुवाकः॥

प्रतिपूरुषमेककपालान् निर्वपत्येकमतिरिक्तं यावन्तो गृह्या स्स्मस्तेभ्यः कमकरं
पशूनाग्ं शर्माऽसि शर्म यजमानस्य
शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थ
आखुस्ते रुद्र पशुस्तं जुषस्वैष ते
रुद्र भाग स्सह स्वस्राऽम्बिकया तं जुषस्व भेषजं गवेऽश्वाय
पुरुषाय भेषजमथो अस्मभ्यं भेषजग्ं सुभेषजं यथाऽसति।

सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम्।
यथा न श्श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात्॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान् मृत्योर् मुक्षीय माऽमृतात्॥

एष ते रुद्र भागस्तं जुषस्व तेनाऽवसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥

प्रतिपूरुषमेक कपालान् निर्वपति। जाता एव प्रजा रुद्रान्निरवदयते।
एकमतिरिक्तम्। जनिष्यमाणा एव प्रजा रुद्रान्निरवदयते।

एककपाला भवन्ति। एकधैव रुद्रन्निरवदयते।
नाभिघारयति। यदभिघारयेत्।

अन्तरव चारिणग्ं रुद्रं कुर्यात्। एकोल्मुकेन यन्ति।
तद्धि रुद्रस्य भागधेयम्। इमां दिशं यन्ति।

एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रन्निरवदयते।
रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशुरिति निर्दिशेद्यं द्विष्यात्।

यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति।
यदि न द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्।

न ग्राम्यान् पशून् हिनस्ति। नारण्यान्।
चतुष्पथे जुहोति। एष वा अग्नीनां पड्बीशो नाम।

अग्निवत्येव जुहोति। मध्यमेन पर्णेन जुहोति।
स्रुग्घ्येषा। अथो खलु।

अन्तमेनैव होतव्यम्। अन्तत एव रुद्रन्निरवदयते।
एष ते रुद्र भाग स्सह स्वस्राऽम्बिकयेत्याह। शरद्वा अस्याम्बिका स्वसा।

तया वा एष हिनस्ति। यग्ं हिनस्ति।
तयैवैनग्ं सह शमयति। भेषजं गव इत्याह।

यावन्त एव ग्राम्याः पशवः। तेभ्यो भेषजं करोति।
अवाम्ब रुद्रमदिमहीत्याह। आशिषमेवैतामाशास्ते।

त्र्यंबकं यजामह इत्याह। मृत्योर्-मुक्षीय माऽमृतादिति वावैतदाह।
उत्किरन्ति। भगस्य लीप्सन्तो।

मूते कृत्वाऽऽसजन्ति। यथा जनं यतेऽवसं करोति।
तादृगेव तत्। एष ते रुद्र भाग इत्याह निरवत्त्यै।

अप्रतीक्षमायन्ति। अपः परिषिञ्चति।
रुद्रस्यान्तर्हित्यै। प्र वा एतेऽस्माल्लोकाच्च्यवन्ते।

ये त्र्यम्बकैश्चरन्ति। आदित्यं चरुं पुनरेत्य निर्वपति।
इयं वा अदितिः। अस्यामेव प्रतितिष्ठन्ति॥[5]

नेत्रत्रयाय वौषट्॥

॥14. त्वमग्ने रुद्रोऽनुवाकः॥

त्वमऽग्ने रुद्रो असुरो महो दिवस्त्वग्ं शर्धो मारुतं पृक्ष ईशिषे।
त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नु त्मना॥

आ वो राजानमध्वरस्य रुद्रग्ं होतारग्ं सत्ययजग्ं रोदस्योः।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम्॥

अग्निर्होता नि षसादा यजीयानुपस्थे मातु स्सुरभावु लोके।
युवा कविः पुरुनिष्ठः ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः॥

साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम्।
स आयुराऽगात्सुरभिर्-वसानो भद्रामकर्-देवहूतिं नो अद्य॥

अक्रन्ददग्नि स्स्तनयन्निव द्यौः क्षामा रेरिहद्-वीरुध स्समञ्जन्न्।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः॥

त्वे वसूनि पुर्वणीक होतर्-दोषा वस्तोरेरिरे यज्ञियासः।
क्षामेव विश्वा भुवनानि यस्मिन्थ्सग्ं सौभगानि दधिरे पावके॥

तुभ्यं ता अङ्गिरस्तम विश्वा स्सुक्षितयः पृथक्।
अग्ने कामाय येमिरे॥

अश्याम तं काममग्ने तवोत्यश्याम रयिग्ं रयिव स्सुवीरम्।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते॥

श्रेष्ठं यविष्ठ भारताऽग्ने द्युमन्तमा भर।
वसो पुरुस्पृहग्ं रयिम्॥

स श्चितानस्तन्–यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन्न्॥

आयुष्टे विश्वतो दधदयमग्निर् वरेण्यः।
पुनस्ते प्राण आऽयति परा यक्ष्मग्ं सुवामि ते॥

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम्॥

तस्मै ते प्रतिहर्यते जातवेदो विचर्षणे।
अग्ने जनामि सुष्टुतिम्॥

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्–द्वितीयं परि जातवेदाः।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः॥

शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे।
त्वं घृतेभिराहुतः॥

दृशानो रुक्म उर्व्या व्यद्यौद्-दुर्मर्षमायु श्श्रिये रुचानः।
अग्निरमृतो अभवद्वयोभिः यदेनं द्यौरजनयत्-सुरेताः॥

आ यदिषे नृपतिं तेज आनट्छुचि रेतो निषिक्तं द्यौरभीके।
अग्नि श्शर्धमनवद्यं युवानग् स्वाधियं जनयत्-सूदयच्च॥

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः॥

अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम्।
विश्वा य श्चर्षणीरभ्यासा वाजेषु सासहत्॥

तमऽग्ने पृतनासहग्ं रयिग्ं सहस्व आ भर।
त्वग्ं हि सत्यो अद्भुतो दाता वाजस्य गोमतः॥

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे।
स्तोमैर्-विधेमाऽग्नये॥

वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्-जनुषाऽज्मान्नम्।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः॥

अग्न आयूग्ंषि पवस आ सुवोर्जमिषं च नः।

आरे बाधस्व दुच्छुनाम्॥

अग्ने पवस्व स्वपा अस्मे वर्च स्सुवीर्यम्।
दधत्-पोषग्ं रयिं मयि॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया।
आ देवान् वक्षि यक्षि च॥

स नः पावक दीदिवोऽग्ने देवाग्ं इहाऽऽवह।
उप यज्ञग्ं हविश्च नः॥

अग्नि श्शुचिव्रततम श्शुचिर्-विप्र श्शुचिः कविः।
शुची रोचत आहुतः॥

उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते।
तव ज्योतीग्ष्यर्चयः॥

त्वमग्ने रुद्रो असुरो महो दिवः। त्वग्ं शर्धो मारुतं पृक्ष ईशिषे।
त्वं वातैररुणैर्यासि शङ्गयः। त्वं पूषा विधतः पासि नु त्मना।

देवा देवेषु श्रयध्वम्। प्रथमा द्वितीयेषु श्रयध्वम्।
द्वितीयास्तृतीयेषु श्रयध्वम्। तृतीयाश्चतुर्थेषु श्रयध्वम्।

चतुर्थाः पञ्चमेषु श्रयध्वम्। पञ्चमा षष्ठेषु श्रयध्वम्।
षष्ठा स्सप्तमेषु श्रयध्वम्। सप्तमा अष्टमेषु श्रयध्वम्।

अष्टमा नवमेषु श्रयध्वम्। नवमा दशमेषु श्रयध्वम्।
दशमा एकादशेषु श्रयध्वम्। एकादशा द्वादशेषु श्रयध्वम्।

द्वादशास्त्रयोदशेषु श्रयध्वम्। त्रयोदशाश्चतुर्दशेषु श्रयध्वम्।
चतुर्दशाः पञ्चदशेषु श्रयध्वम्। पञ्चदशा ष्षोडशेषु श्रयध्वम्।

षोडशा स्सप्तदशेषु श्रयध्वम्। सप्तदशा अष्टादशेषु श्रयध्वम्।
अष्टादशा एकान्नविग्ंशेषु श्रयध्वम्। एकान्नविग्ंशा विग्ंशेषु श्रयध्वम्।

विग्ंशा एकविग्ंशेषु श्रयध्वम्। एकविग्ंशा द्वाविग्ंशेषु श्रयध्वम्।
द्वाविग्ंशास्त्रयोविग्ंशेषु श्रयध्वम्। त्रयोविग्ंशाश्चतुर्विग्ंशेषु श्रयध्वम्।

चतुर्विग्ंशाः पञ्चविग्ंशेषु श्रयध्वम्। पञ्चविग्ंशा ष्षड्विग्ंशेषु श्रयध्वम्।
षड्विग्ंशा स्सप्तविग्ंशेषु श्रयध्वम्। सप्तविग्ंशा अष्टाविग्ंशेषु श्रयध्वम्।

अष्टाविग्ंशा एकान्नत्रिग्ंशेषु श्रयध्वम्। एकान्नत्रिग्ंशास्त्रिग्ंशेषु श्रयध्वम्।
त्रिग्ंशा एकत्रिग्ंशेषु श्रयध्वम्। एकत्रिग्ंशा द्वात्रिग्ंशेषु श्रयध्वम्।

द्वात्रिग्ंशास्त्रयस्त्रिग्ंशेषु श्रयध्वम्। देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिग्ंशाः।
उत्तरे भवत। उत्तरवर्त्मान उत्तरसत्वानः।

यत्काम इदं जुहोमि। तन्मे समृद्ध्यताम्।
वयगग् स्याम पतयो रयीणाम्। भूर्भुव स्स्व स्स्वाहा॥

अस्त्रायफट्॥

भूर्भुवस्सुवरो मिति दिग्भन्धः॥

॥15. पञ्चाङ्ग जपः॥

हगं॑सश्शु॑चिषद्वसु॑रन्तरिक्षसद्धोता॑ वेदिषदति॑थिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥

प्रतद्विष्णु॑ स्स्तवते वीर्या॑य। मृगो न भीमः कु॑चरो गि॑रिष्ठाः।
यस्यो॑रुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा॥

त्र्यं॑बकं यजामहे सुगन्धिं पु॑ष्टिवर्ध॑नम्।
उर्वारु॑कमिव बन्ध॑नान् मृत्योर्मुक्षीय माऽमृतात्॥

तथ्स॑वितुर्वृ॑णीमहे। वयं देवस्य भोज॑नम्।
श्रेष्ठग्ं॑ सर्वधा॑तमम्। तुरं भगस्य धीमहि॥

विष्णुर्यो॑निं कल्पयतु। त्वष्टा॑ रूपाणि॑ पिग्ंशतु।
आसिञ्चतु प्रजाप॑तिः। धाता गर्भं॑ दधातु ते॥

॥16. अष्टाङ्ग प्रणामः॥

हिरण्यगर्भ स्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
[उरसा नमः॥] उमामहेश्वराभ्यां नमः॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥
[शिरसा नमः॥] उमामहेश्वराभ्यां नमः॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः।
स बुद्ध्निया उपमा अस्य विष्टास्सतश्च योनि मसतश्च विवः॥
[दृष्ट्या नमः॥] उमामहेश्वराभ्यां नमः॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्।
पिपृतां नो भरीमभिः॥
[मनसा नमः॥] उमामहेश्वराभ्यां नमः॥

उपश्वासय पृथिवीमुतद्यां पुरुत्रा ते मनुतां विष्ठितं जगत्।
सदुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून्।
[वचसा नमः॥] उमामहेश्वराभ्यां नमः॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम॥

[पद्भ्यां नमः॥] उमामहेश्वराभ्यां नमः॥

या ते अग्ने रुद्रिया तनूस्तयानः पाहि तस्यास्ते स्वाहा॥

[याते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीग् स्वाहा॥]

[कराभ्यां नमः॥] उमामहेश्वराभ्यां नमः॥

इमं यमप्रस्तरमाहि सीदाङ्गिरोभिः पितृभि स्संविदानः।

आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व॥

[कर्णाभ्यां नमः॥] उमामहेश्वराभ्यां नमः॥

उरसा शिरसा दृष्ट्या मनसा वचसा तथा।

पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोष्टाङ्ग उच्यते॥

॥लघुन्यासः॥

ओं अथात्मानं शिवात्मानं श्री रुद्ररूपं ध्यायेत्॥

शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम्॥

नीलग्रीवं शशाङ्काङ्कं नागयज्ञोपवीतिनम्।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभय-प्रदम्॥

कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम्।
ज्वलन्तं पिङ्गलजटा-शिखामुद्योतधारिणम्॥

वृषस्कन्ध-समारूढं उमादेहार्ध-धारिणम्।
अमृतेनाप्लुतं शान्तं दिव्यभोग-समन्वितम्॥

दिग्देवतासमायुक्तं सुरासुरनमस्कृतम्।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्॥

सर्वव्यापिन-मीशानं रुद्रं वै विश्वरूपिणम्।
एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत्॥

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः। आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो ब्रह्मचारी

शुक्लवासा देवाभिमुखः स्थित्वा आत्मनि देवताः स्थापयेत्।

प्रजनने ब्रह्मा तिष्ठतु। पादयो र्विष्णुस्तिष्ठतु। हस्तयो–र्हरस्तिष्ठतु। बाह्वो रिन्द्रस्तिष्ठतु। जठरे अग्निस्तिष्ठतु। हृदये शिवस्तिष्ठतु। कण्ठे वसव स्तिष्ठन्तु। वक्त्रे सरस्वती तिष्ठतु। नासिकयो र्वायुस्तिष्ठतु। नयनयो श्चन्द्रादित्यौ तिष्ठेताम्। कर्णयो रश्विनौ तिष्ठेताम्। ललाटे रुद्रास्तिष्ठन्तु। मूर्ध्न्यादित्यास्तिष्ठन्तु। शिरसि महादेवस्तिष्ठतु। शिखायां वामदेवस्तिष्ठतु। पृष्ठे पिनाकी तिष्ठतु। पुरत श्शूली तिष्ठतु। पार्श्वयो श्शिवाशङ्करौ तिष्ठेताम्। सर्वतो वायुस्तिष्ठतु। ततो बहि स्सर्वतोऽग्नि–र्ज्वालामाला–परिवृत–स्तिष्ठतु। सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु। माग्ं रक्षन्तु॥
[यजमानं सह कुटुंबं रक्षन्तु, सर्वेषां भक्त महा जनानां सह कुटुंबानां रक्षन्तु॥]

अग्निर्मे वाचि श्रितः। वाग्घृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

वायुर्मे प्राणे श्रितः। प्राणो हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

चन्द्रमा मे मनसि श्रितः। मनो हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

दिशो मे श्रोत्रे श्रिताः। श्रोत्रग्ं हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

आपो मे रेतसि श्रिताः। रेतो हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पृथिवी मे शरीरे श्रिता। शरीरग्ं हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

इन्द्रो मे बले श्रितः। बलग्ं हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ईशानो मे मन्यौ श्रितः। मन्युर्हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

आत्मा म आत्मनि श्रितः। आत्मा हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्।

वैश्वानरो रश्मिभिर्वावृधानः।
अन्तस्तिष्ठत्वमृतस्य गोपाः।

॥साम्ब परमेश्वर षोडशोपचार पूजा॥

आराथितो मनुष्यैस्त्वं सिद्धै र्देवा सुरादिभिः।
आराधयामि भक्त्या त्वाऽनुग्रहाण महेश्वर॥

॥कलशेषु ध्यानम्॥

ध्यायेन्निरामयं वस्तु सर्गस्थिति लयादिकम्।
निर्गुणं निष्कलं नित्यं मनोवाचामगोचरम्॥

गङ्गाधरं शशिधरं जतामकुट शोभितम्।
श्वेतभूति त्रिपुण्डेण विराजित ललाटकम्॥

लोचनत्रय संपन्नं स्वर्णकुण्डल शोभितम्।
स्मेराननं चतुर्बाहुं मुक्ताहारोप शोभितम्॥

अक्षमालां सुधाकुंभं चिन्मयीं मुद्रिकामपि।
पुस्तकं च भुजै र्दिव्यै र्दधानं पार्वतीपतिम्॥

श्वेताम्बधरं स्वेतं रत्नसिंहासन स्थितम्।
सर्वाभीष्ट प्रदातारं वटमूल निवासिनम्॥

जपाकुसुम साहस्र समान श्रिय मीश्वरीम्।

सुवर्ण रत्नखचित मकुटेन विराजिताम्॥

ललाटपट्टसंराजत् संलग्न तिलकाञ्चिताम्।
राजीवायत नेत्रान्तां नीलोत्पलदलेक्षणाम्॥

सन्तप्त हेमखचित ताटङ्काभरणान्विताम्।
तांबूल चर्वण रत रक्तजिह्वा विराजिताम्॥

पताकाभरणोपेतां मुक्ताहारोप शोभिताम्।
स्वर्णकङ्कण संयुक्तै श्चतुर्भि र्बाहुभि र्युताम्॥

सुवर्णरत्नखचित काञ्चीदाम विराजिताम्।
कदलील लितस्तम्भ सन्निभोरु युगान्विताम्॥

श्रिया विराजितपदां भक्तत्राणपरायणाम्।
अन्योन्याश्लिष्टहृद्बाहु गौरीशङ्कर संज्ञकम्॥

सनातनं परं ब्रह्म परमात्मान मव्ययम्।
आवाहयामि जगता मीश्वरं परमेश्वरम्॥

आ त्वा वहन्तु हरय स्सचेतस श्श्वेतैरश्वै स्सह केतुमद्भिः।
वाताजितै र्बलवद्भि र्मनोजवै रायाहि शीघ्रं मम हव्याय शर्वोम्॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥

गौरीमिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥

॥आवाहनम्॥

नमस्ते रुद्र मन्यव उतोत इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥
ओं ह्रीं नम शिवाय।

सद्योजातं प्रपद्यामि। ओं भूर्भुवस्सुवरोम्।
अस्मिन् कुम्भे (अस्यां प्रतिमायां)
महादेवं ध्यायामि आवाहयामि॥
शिवं ध्यायामि आवाहयामि।
रुद्रं ध्यायामि आवाहयामि।
शङ्करं ध्यायामि आवाहयामि।
नीललोहितं ध्यायामि आवाहयामि।
ईशानं ध्यायामि आवाहयामि।
विजयं ध्यायामि आवाहयामि।
भीमं ध्यायामि आवाहयामि।
देवदेवं ध्यायामि आवाहयामि।

भवोद्भवं ध्यायामि आवाहयामि।

(मध्ये) आदित्यात्मक रुद्रं ध्यायामि आवाहयामि॥

(इति तत्तत् कलशेषु आवाह्य)॥

प्राण प्रतिष्ठा

आदित्यात्मक–रुद्रस्य प्राण प्रतिष्ठा – महामन्त्रस्य।

ब्रह्मा–विष्णु–महेश्वरा ऋषयः।

ऋग्यजुस्सामाथर्वाणि छन्दांसि।

सकल जगत् सृष्टि– स्थिति–संहार कारिणी प्राणशक्तिः परादेवता।

आं बीजम्। ह्रीं शक्तिः। क्रों कीलकम्।

आदित्यात्मक – रुद्रस्य प्राणप्रतिष्ठार्थे जपे विनियोगः॥

आं – अङ्गुष्ठाभ्यां नमः।

ह्रीं – तर्जनीभ्यां नमः।

क्रों – मध्यमाभ्यां नमः।

आं – अनामिकाभ्यां नमः।

ह्रीं – कनिष्ठिकाभ्यां नमः।

क्रों – करतलकरपृष्ठाभ्यां नमः।

आं – हृदयाय नमः।

ह्रीं – शिरसे स्वाहा।

क्रों – शिखायै वषट्।

आं – कवचायहुम्।

ह्रीं – नेत्रत्रयाय वौषट्।

क्रों – अस्त्राय फट्।

भूर्बुव स्सुवरोमिति दिग्भन्धः।

ध्यानम्

रक्तांभोधिस्थ – पोतोल्लस – दरुण – सरोजाधिरूडा–कराब्जैः

पाशं कोदण्डमिक्षूद्भव – मळिगुण – मप्यङ्कुशं – पञ्चबाणान्।

बिभ्राणासृक्कपालं त्रिणयन लसिता पीनवक्षोरुहाढ्या

देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

लं – पृथिव्यात्मिकायै गन्धं समर्पयामि।

हं – आकाशात्मिकायै पुष्पैः पूजयामि।

यं – वाय्वात्मिकायै धूपमाघ्रापयामि।

रं – अग्न्यात्मिकायै दीपं दर्शयामि।

वं – अमृतात्मिकायै अमृतं महानैवेद्यं निवेदयामि।

सं – सर्वात्मिकायै सर्वोपचार पूजां समर्पयामि॥

आं – ह्रीं – क्रों, क्रों – ह्रीं – आं यरलवशषसहोम्।

क्षं हंस स्सोहं, सोहं हंसः।

आदित्यात्मक – रुद्रस्य प्राणा इह प्राणाः॥

आं – ह्रीं – क्रों, क्रों – ह्रीं – आं यरलवशषसहोम्।

क्षं हंस स्सोहं, सोहं हंसः।
आदित्यात्मक – रुद्रस्य जीव इह प्राणाः॥

आं – ह्रीं – क्रों, क्रों – ह्रीं – आं यरलवशषसहोम्।
क्षं हंस स्सोहं, सोहं हंसः।
आदित्यात्मक – रुद्रस्य सर्वेन्दियाणि
वाङ् – मनश्चक्षु – श्रोत्र – जिह्वा – घ्राण –
प्राणापान – व्यानोदान – समाना
इहैवागत्य इहैवास्मिन् कुम्भे सुखं चिरं तिष्टन्तु स्वाहा॥

आसुनीतो पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगाम्।
ज्योक् पश्येम सूर्यमुच्चरन्त – मनुमते मृडया नस्स्वस्ति।

आवाहितो भव। स्थापितो भव।
सन्निहितो भव। सन्निरुद्धो भव।
अवकुण्ठितो भव। सुप्रीतो भव।
सुप्रसन्नो भव। वरदो भव। प्रसीद प्रसीद।
स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम्।
तावत्त्वं प्रीतिभावेन कुम्भेऽस्मिन् सन्निधिं कुरु॥
आदित्यात्मक रुद्रस्य प्राणान् प्रतिष्ठापयामि॥
(पञ्चोपचार पूजा॥ यत्किञ्चिन्निवेदनम्॥)

या त इषु श्शिवतमा शिवं बभूव ते धनुः।

शिवा शरव्या या तव तया नो रुद्र मृडय॥
ओं ह्रीं नम शिवाय। सद्योजाताय वै नमो नमः।
रत्न सिंहासनं समर्पयामि॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तनुवा शन्तमया गिरिशन्ताऽभिचाकशीहि॥
ओं ह्रीं नम शिवाय। भवेभवे नातिभवे भवस्व माम्।
पादयोः पाद्यं समर्पयामि॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंग्ंसीः पुरुषं जगत्॥
ओं ह्रीं नम शिवाय। भवोद्भवाय नमः। आर्घ्यं समर्पयामि॥

शिवेन वचसा त्वा गिरिशाऽच्छा वदामसि।
यथा न स्सर्वमिज्जगदयक्ष्मग्ं सुमना असत्॥
ओं ह्रीं नम शिवाय। वामदेवाय नमः। आचमनीयं समर्पयामि॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहीग्ंश्च सर्वाञ्जम्भयन्थ्सर्वाश्च यातुधान्यः॥
ओं ह्रीं नम शिवाय। ज्येष्ठाय नमः। मधुपर्कं समर्पयामि॥

असौ यस्ताम्रो अरुण उत बभ्रु स्सुमङ्गलः।
ये चेमाग्ं रुद्रा अभितो दिक्षु श्रिताः

सहस्रशोऽवैषाग्ं हेड ईमहे॥

ओं ह्रीं नम शिवाय। श्रेष्ठाय नमः। स्नानं समर्पयामि॥

स्नानानन्तरं आचमनीयं समर्पयामि॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः॥
ओं ह्रीं नम शिवाय। रुद्राय नमः। वस्त्रोत्तरीयं समर्पयामि॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः॥
ओं ह्रीं नम शिवाय। कालाय नमः। यज्ञोपवीतं समर्पयामि॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप॥
ओं ह्रीं नम शिवाय। कलविकरणाय नमः। गन्धस्योपरि अक्षतान् समर्पयामि॥

अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो न स्सुमना भव॥
ओं ह्रीं नम शिवाय। बलविकरणाय नमः। पुष्पैः पूजयामि॥

ओं भवाय देवाय नमः।

ओं शर्वाय देवाय नमः।

ओं ईशानाय देवाय नमः।

ओं पशुपतये देवाय नमः।

ओं रुद्राय देवाय नमः।

ओं उग्राय देवाय नमः।

ओं भीमाय देवाय नमः।

ओं महते देवाय नमः।

ओं भवस्य देवस्य पत्न्यै नमः।

ओं शर्वस्य देवस्य पत्न्यै नमः।

ओं ईशानस्य देवस्य पत्न्यै नमः।

ओं पशुपतेः देवस्य पत्न्यै नमः।

ओं रुद्रस्य देवस्य पत्न्यै नमः।

ओं उग्रस्य देवस्य पत्न्यै नमः।

ओं भीमस्य देवस्य पत्न्यै नमः।

ओं महतो देवस्य पत्न्यै नमः।

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः॥
ओं ह्रीं नम श्शिवाय। बलाय नमः। दूपमाघ्रापयामि॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज॥
ओं ह्रीं नम श्शिवाय। बलप्रमथनाय नमः।

दीपं दर्शयामि॥ आचमनीयं समर्पयामि॥

ओं भूर्भुवस्सुवः + ब्रह्मणे स्वाहा॥

नमस्ते अस्त्वायुधायाऽनातताय धृष्णवे।

उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥

ओं ह्रीं नम श्शिवाय। सर्वभूतदमनाय नमः।

महानैवेद्यं निवेदयामि॥

मध्ये मध्ये अमृतपानीयं समर्पयामि॥

अमृतापिधानमसि। हस्त प्रक्षालनं समर्पयामि॥

पादप्रक्षालनं समर्पयामि॥ आचमनीयं समर्पयामि॥

परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः।

अथो य इषुधिस्तवाऽऽरे अस्मन्नि धेहि तम्॥

ओं ह्रीं नम श्शिवाय। मनोन्मनाय नमः।

कर्पूर तांबूलं समर्पयामि॥

नमस्ते अस्तु भगवन् विश्वेश्वराय

महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय

त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय

मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय

श्रीमन्महादेवाय नमः॥

कर्पूरनीराजनदीपं दर्शयामि॥

बृहत्साम क्षत्रभृद् वृद्धवृष्णियं त्रिष्टुभौजश्शुभित-मुग्र-वीरम्।
इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष॥
रक्षां धारयामि।

(ततो नमो हिरण्यबाहवे इत्यारभ्य नम आमीवत्केभ्यः इत्यन्तं मन्त्रपदेरेव त्रिशतार्चनं कुर्यात्)

द्रापे अन्धसस्पते + पराचीना मुखा कृधि॥

प्रदक्षिणं कृत्वा॥

सहस्राणि सहस्रशो + तं वो जम्भे दधामि॥

नमस्कारान् कृत्वा॥

(तत स्समग्र - चमकानुवाकै स्सर्वाभीष्टं प्रार्थयेत्)

अग्नाविष्णू सजोषसे + भुवनश्चाधिपतिश्च॥
महादेवादिभ्योनमः॥ समस्तोपचारान् समर्पयामि॥

(अथाशिषमाशास्ते **TB-3-5-10-4**॥) आयुराशास्ते।
सुप्रजास्त्वमाशास्ते। सजातवनस्यामाशास्ते॥
उत्तरां देव यज्यामाशास्ते। भूयो हविष्करणमाशास्ते।

दिव्यं धामाशास्ते। विश्वं प्रियमाशास्ते।
यदनेन हविषाऽऽशास्ते। तदश्यात्तदृद्ध्यात्।
तदस्मै देवा रासन्ताम्। तदग्निर्देवो देवेभ्यो वनते।
वयमग्नेर्मानुषाः। इष्टं च वीतं च।
उभे च नो द्यावापृथिवी अग्ंहस स्स्पाताम्।
इह गतिर्वामस्येदं च। नमो देवेभ्यः॥

॥श्री रुद्रनाम त्रिशती॥

नमो हिरण्यबाहवे नमः। सेनान्ये नमः।

दिशां च पतये नमः। नमो वृक्षेभ्यो नमः।

हरिकेशेभ्यो नमः। पशूनां पतये नमः।

नम स्सस्पिञ्जराय नमः। त्विषीमते नमः।

पथीनां पतये नमः। नमो बभ्लुशाय नमः।

विव्याधिने नमः। अन्नानां पतये नमः।

नमो हरिकेशाय नमः। उपवीतिने नमः।

पुष्टानां पतये नमः। नमो भवस्य हेत्यै नमः।

जगतां पतये नमः। नमो रुद्राय नमः।

आततविने नमः। क्षेत्राणां पतये नमः।

नम स्सूताय नमः। अहन्त्याय नमः।

वनानां पतये नमः। नमो रोहिताय नमः।

स्थपतये नमः। वृक्षाणां पतये नमः।

नमो मन्त्रिणे नमः। वाणिजाय नमः।

कक्षाणां पतये नमः। नमो भुवन्तये नमः।

वारिवस्कृताय नमः। ओषधीनां पतये नमः।

नम उच्चैर्घोषाय नमः। आक्रन्दयते नमः।

पत्तीनाम् पतये नमः। नमः कृत्स्नवीताय नमः।

धावते नमः। सत्त्वनां पतये नमः॥

नम स्सहमानाय नमः। निव्याधिने नमः।

आव्याधिनीनां पतये नमः। नमः ककुभाय नमः।

निषङ्गिणे नमः। स्तेनानां पतये नमः।

नमो निषङ्गिणे नमः। इषुधिमते नमः।

तस्कराणां पतये नमः। नमो वञ्चते नमः।

परिवञ्चते नमः। स्तायूनां पतये नमः।

नमो निचेरवे नमः। परिचराय नमः।

अरण्यानां पतये नमः। नम स्सृकाविभ्यो नमः।

जिघाग्ं सद्भ्यो नमः। मुष्णतां पतये नमः।

नमो ऽसिमद्भ्यो नमः। नक्तञ्चरद्भ्यो नमः।

प्रकृन्तानां पतये नमः। नम उष्णीषिने नमः।

गिरिचराय नमः। कुलुञ्चानां पतये नमः।

नम इषुमद्भ्यो नमः। धन्वाविभ्यश्च नमः।

वो नमः। नम आतन्वानेभ्यो नमः।

प्रतिदधानेभ्यश्च नमः। वो नमः।

नम आयच्छद्भ्यो नमः। विसृजद्भ्यश्च नमः।

वो नमः। नमो ऽस्यद्भ्यो नमः।

विध्यद्भ्यश्च नमः। वो नमः।

नम आसीनेभ्यो नमः। शयानेभ्यश्च नमः।

वो नमः। नम स्स्वपद्भ्यो नमः।

जाग्रद्भ्यश्च नमः। वो नमः।

नमस्तिष्ठद्भ्यो नमः। धावद्भ्यश्च नमः।

वो नमः। नमस्सभाभ्यो नमः।

सभापतिभ्यश्च नमः। वो नमः।

नमो अश्वेभ्यो नमः। अश्वपतिभ्यश्च नमः।

वो नमः। नम आव्याधिनीभ्यो नमः।

विविध्यन्तीभ्यश्च नमः। वो नमः।

नम उगणाभ्यो नमः। तृगं हतीभ्यश्च नमः।

वो नमः। नमो गृत्सेभ्यो नमः।

गृत्सपतिभ्यश्च नमः। वो नमः।

नमो व्रातेभ्यो नमः। व्रातपतिभ्यश्च नमः।

वो नमः। नमो गणेभ्यो नमः।

गणपतिभ्यश्च नमः। वो नमः।

नमो विरूपेभ्यो नमः। विश्वरूपेभ्यश्च नमः।

वो नमः। नमो महद्भ्यो नमः।

क्षुल्लकेभ्यश्च नमः। वो नमः।

नमो रथिभ्यो नमः। अरथेभ्यश्च नमः।

वो नमः। नमो रथेभ्यो नमः।

रथपतिभ्यश्च नमः। वो नमः।

नमस्सेनाभ्यो नमः। सेनानिभ्यश्च नमः।

वो नमः। नमः क्षत्तृभ्यो नमः।

संग्रहीतृभ्यश्च नमः। वो नमः।

नमस्तक्षभ्यो नमः। रथकारेभ्यश्च नमः।

वो नमः। नमः कुलालेभ्यो नमः।

कर्मारेभ्यश्च नमः। वो नमः।

नमः पुञ्जिष्टेभ्यो नमः। निषादेभ्यश्च नमः।

वो नमः। नम इषुकृद्भ्यो नमः।

धन्वकृद्भ्यश्च नमः। वो नमः।

नमो मृगयुभ्यो नमः। श्वनिभ्यश्च नमः।

वो नमः। नम श्श्वभ्यो नमः।

श्वपतिभ्यश्च नमः। वो नमः।

नमो भवाय च नमः। रुद्राय च नमः।

नमश्शर्वाय च नमः। पशुपतये च नमः।

नमो नीलग्रीवाय च नमः। शितिकण्ठाय च नमः।

नमः कपर्दिने च नमः। व्युप्तकेशाय च नमः।

नमस्सहस्राक्षाय च नमः। शतधन्वने च नमः।

नमो गिरिशाय च नमः। शिपिविष्टाय च नमः।

नमो मीढुष्टमाय च नमः। इषुमते च नमः।

नमो ह्रस्वाय च नमः। वामनाय च नमः।

नमो बृहते च नमः। वर्षीयसे च नमः।

नमो वृद्धाय च नमः। संवृध्वने च नमः।

नमो अग्रियाय च नमः। प्रथमाय च नमः।

नम आशवे च नमः। अजिराय च नमः।

नम श्शीघ्रियाय च नमः। शीभ्याय च नमः।

नम ऊर्म्याय च नमः। अवस्वन्याय च नमः।

नम स्स्रोतस्याय च नमः। द्वीप्याय च नमः।

नमो ज्येष्ठाय च नमः। कनिष्ठाय च नमः।

नमः पूर्वजाय च नमः। अपरजाय च नमः।

नमो मध्यमाय च नमः। अपगल्भाय च नमः।

नमो जघन्याय च नमः। बुध्नियाय च नमः।

नम स्सोभ्याय च नमः। प्रतिसर्याय च नमः।

नमो याम्याय च नमः। क्षेम्याय च नमः।

नम उर्वर्याय च नमः। खल्याय च नमः।

नम श्श्लोक्याय च नमः। अवसान्याय च नमः।

नमो वन्याय च नमः। कक्ष्याय च नमः।

नम श्श्रवाय च नमः। प्रतिश्रवाय च नमः।

नम आशुषेणाय च नमः। आशुरथाय च नमः।

नम श्शूराय च नमः। अवभिन्दते च नमः।

नमो वर्मिणे च नमः। वरूथिने च नमः।

नमो बिल्मिने च नमः। कवचिने च नमः।

नमश्श्रुताय च नमः। श्रुतसेनाय च नमः।

नमो दुन्दुभ्याय च नमः। आहनन्याय च नमः।

नमो धृष्णवे च नमः। प्रमृशाय च नमः।

नमो दूताय च नमः। प्रहिताय च नमः।

नमो निषङ्गिणे च नमः। इषुधिमते च नमः।

नमस्तीक्ष्णेषवे च नमः। आयुधिने च नमः।

नम स्स्वायुधाय च नमः। सुधन्वने च नमः।

नम स्स्रुत्याय च नमः। पथ्याय च नमः।

नमः काट्याय च नमः। नीप्याय च नमः।

नमस्सूद्याय च नमः। सरस्याय च नमः।

नमो नाद्याय च नमः। वैशन्ताय च नमः।

नमः कूप्याय च नमः। अवट्याय च नमः।
नमो वर्ष्याय च नमः। अवर्ष्याय च नमः।
नमो मेघ्याय च नमः। विद्युत्याय च नमः।
नम ईध्रियाय च नमः। आतप्याय च नमः।
नमो वात्याय च नमः। रेष्मियाय च नमः।
नमो वास्तव्याय च नमः। वास्तुपाय च नमः।

नमस्सोमाय च नमः। रुद्राय च नमः।
नमस्ताम्राय च नमः। अरुणाय च नमः।
नम श्शङ्गाय च नमः। पशुपतये च नमः।
नम उग्राय च नमः। भीमाय च नमः।
नमो अग्रेवधाय च नमः। दूरेवधाय च नमः।
नमो हन्त्रे च नमः। हनीयसे च नमः।
नमो वृक्षेभ्यो नमः। हरिकेशेभ्यो नमः।
नमस्ताराय नमः। नमश्शंभवे च नमः।
मयोभवे च नमः। नमश्शङ्कराय च नमः।
मयस्कराय च नमः। नम श्शिवाय च नमः।
शिवतराय च नमः। नमस्तीर्थ्याय च नमः।
कूल्याय च नमः। नमः पार्याय च नमः।
अवार्याय च नमः। नमः प्रतरणाय च नमः।
उत्तरणाय च नमः। नम आतार्याय च नमः।
आलाद्याय च नमः। नम श्शष्प्याय च नमः।
फेन्याय च नमः। नम स्सिकत्याय च नमः।

प्रवाह्याय च नमः।

नम इरिण्याय च नमः। प्रपथ्याय च नमः।
नमः कि ग्ं शिलाय च नमः। क्षयणाय च नमः।
नमः कपर्दिने च नमः। पुलस्तये च नमः।
नमो गोष्ठ्याय च नमः। गृह्याय च नमः।
नमस्तल्प्याय च नमः। गेह्याय च नमः।
नमः काट्याय च नमः। गह्वरेष्ठाय च नमः।
नमो ह्रदय्याय च नमः। निवेष्प्याय च नमः।
नमः पा ग्ं सव्याय च नमः। रजस्याय च नमः।
नम श्शुष्क्याय च नमः। हरित्याय च नमः।
नमो लोप्याय च नमः। उलप्याय च नमः।
नम ऊर्व्याय च नमः। सूर्म्याय च नमः।
नमः पर्ण्याय च नमः। पर्णशद्याय च नमः।
नमोपगुरमाणाय च नमः। अभिघ्नते च नमः।
नम आक्खिदते च नमः। प्रक्खिदते च नमः।
वो नमः। किरिकेभ्यो नमः।
देवानाग्ं हृदयेभ्यो नमः। नमो विक्षीणकेभ्यो नमः।
नमो विचिन्वत्केभ्यो नमः। नम आनिर्हतेभ्यो नमः।
नम आमीवत्केभ्यो नमः।

अस्य श्री रुद्राध्याय प्रश्न महा मन्त्रस्य, अघोर ऋषिः, अनुष्टुप् छन्दः, सङ्कर्षणमूर्ति स्वरूपो योसावादित्यः परम पुरुष स्स एष रुद्रो देवता। नमश्शिवायेति बीजम्। शिवतरायेति शक्तिः। महा देवायेति कीलकम्। श्री सांब सदाशिव प्रसाद सिद्ध्यर्थे जपे विनियोगः॥

ओं अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः।

दर्श पूर्ण मासात्मने तर्जनीभ्यां नमः।

चातुर्मास्यात्मने मध्यमाभ्यां नमः।

निरूढ पशुबन्धात्मने अनामिकाभ्यां नमः।

ज्योतिष्टो मात्मने कनिष्ठिकाभ्यां नमः।

सर्व क्रत्वात्मने करतलकरपृष्ठाभ्यां नमः।

अग्निहोत्रात्मने हृदयाय नमः।

दर्श पूर्ण मासात्मने शिरसे स्वाहा।

चातुर्मास्यात्मने शिखायै वषट्।

निरूढ पशुबन्धात्मने कवचायहुम्।

ज्योतिष्टो मात्मने नेत्रत्रयाय वौषट्।

सर्व क्रत्वात्मने अस्त्राय फट्।

भूर्भुव स्सुवरोमिति दिग्भन्धः।

ध्यानम्

आपाताळ नभ स्स्थलान्त भुवन ब्रह्माण्डमावि स्फुरत्

ज्योति स्फाटिक लिङ्ग मौळि विलसत्पूर्णेन्दु वान्तामृतैः।

अस्तोकाप्लुत मेकमीश मनिशं रुद्रानुवाकां जपन्

ध्याये दीप्सित सिद्धये ध्रुवपदं विप्रोभिषिञ्चेच्छिवम्॥

ब्रह्माण्ड व्याप्त देहा भसित हिम रुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दा कलित शशिकला–श्चण्डकोदण्ड हस्ताः।
त्र्यक्षा रुद्राक्ष मालाः प्रकटितविभवा श्शांभवा मूर्तिभेदाः
रुद्रा श्श्री रुद्रसूक्त–प्रकटितविभवा नः प्रयच्छन्तु सौख्यम्॥

ओं गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ न श्शृण्वन्नूतिभिस्सीद सादनम्॥
महागणपतये नमः॥

॥शान्तिपाठः॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥
ओं शान्ति श्शान्ति श्शान्तिः॥

॥श्री रुद्र प्रश्नः॥

ओं नमो भगवते रुद्राय

नमस्ते रुद्र मन्यव उतो त इषवे नमः।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः॥

या त इषु श्शिवतमा शिवं बभूव ते धनुः।
शिवा शरव्या या तव तया नो रुद्र मृडय॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी।
तया नस्तनुवा शन्तमया गिरिशन्ताऽभि चाकशीहि॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्॥

शिवेन वचसा त्वा गिरिशाऽच्छा वदामसि।
यथा न स्सर्वमिज्जगदयक्ष्मगं सुमना असत्॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहीग्श्च सर्वाञ्जंभयन्थ्सर्वाश्च यातुधान्यः॥

असौ यस्ताम्रो अरुण उत बभ्रु स्सुमङ्गलः।

ये चेमाग्ं रुद्रा अभितो दिक्षु श्रिता स्सहस्रशोऽवैषाग्ं हेड ईमहे॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृशन्नदृशन्नुदहार्यः।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥

प्र मुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम्।
याश्च ते हस्त इषवः परा ता भगवो वप॥

अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखा शिवो न स्सुमना भव॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परि ब्भुज॥

नमस्ते अस्त्वायुधायाऽनातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
अथो य इषुधिस्तवाऽऽरे अस्मन्नि धेहि तम्॥

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः॥1॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नम स्सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाऽऽततविने क्षेत्राणां पतये नमो नम स्सूतायाऽहन्त्याय वनानां पतये नमो नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाऽऽक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्वनां पतये नमः॥2॥

नम स्सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायाऽरण्यानां पतये नमो नम स्सृकाविभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्य श्शयानेभ्यश्च वो नमो नम स्स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नम स्सभाभ्य स्सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः॥3॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृग्ंहतीभ्यश्च वो नमो नमो गृत्सेभ्यो
गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो
विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो
नमो रथेभ्यो रथपतिभ्यश्च वो नमो नम स्सेनाभ्य स्सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्य स्सङ्ग्रहीतृभ्यश्च वो
नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो
निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्य श्श्वनिभ्यश्च वो नमो नम श्श्वभ्य
श्श्वपतिभ्यश्च वो नमः॥4॥

नमो भवाय च रुद्राय च नम श्शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने
च व्युप्तकेशाय च नम स्सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय
चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्वने च नमो
अग्रियाय च प्रथमाय च नम आशवे चाऽजिराय च नम श्शीघ्रियाय च शीभ्याय च नम ऊर्म्याय
चाऽवस्वन्याय च नम स्स्रोतस्याय च द्वीप्याय च॥5॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चाऽपरजाय च नमो मध्यमाय चाऽपगल्भाय च नमो जघन्याय
च बुध्नियाय च नम स्सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च
नम श्श्लोक्याय चाऽवसान्याय च नमो वन्याय च कक्ष्याय च नम श्श्रवाय च प्रतिश्रवाय च नम
आशुषेणाय चाऽऽशुरथाय च नम श्शूराय चाऽवभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च
कवचिने च नम श्श्रुताय च श्रुतसेनाय च॥6॥

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे
चेषुधिमते च नमस्तीक्ष्णेषवे चाऽऽयुधिने च नम स्स्वायुधाय च सुधन्वने च नम स्स्रुत्याय च पथ्याय च
नमः काट्याय च नीप्याय च नम स्सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय

चाऽवट्याय च नमो वर्ष्याय चाऽवर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च॥7॥

नम स्सोमाय च रुद्राय च नमस्ताम्राय चाऽरुणाय च नम श्शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नम श्शंभवे च मयोभवे च नम श्शङ्कराय च मयस्कराय च नम श्शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चाऽवार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चाऽऽलाद्याय च नम श्शष्प्याय च फेन्याय च नम स्सिकत्याय च प्रवाह्याय च॥8॥

नम इरिण्याय च प्रपथ्याय च नमः किग्ंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाग्ंसव्याय च रजस्याय च नम श्शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाऽभिघ्नते च नम आक्खिदते च प्रक्खिदते च नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः॥9॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित।
एषां पुरुषाणामेषां पशूनां मा भेर्माऽरोमो एषाङ्किञ्चनाऽऽममत्॥

या ते रुद्र शिवा तनू श्शिवा विश्वाहभेषजी।
शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥

इमाग्ं रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्।

यथा न श्शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते॥

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु।
रक्षा च नो अधि च देव ब्रूह्यधा च न श्शर्म यच्छ द्विबर्हाः॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्।
मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि वपन्तु सेनाः॥

परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय॥

मीढुष्टम शिवतम शिवो न स्सुमना भव।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि॥

विकिरिद विलोहित नमस्ते अस्तु भगवः।
यास्ते सहस्रग्ं हेतयोऽन्यमस्मन्नि वपन्तु ताः॥

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः।
तासामीशानो भगवः पराचीना मुखा कृधि॥10॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्।
तेषाग्ं सहस्रयोजनेऽव धन्वानि तन्मसि॥

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि।
नीलग्रीवा शितिकण्ठा श्शर्वा अधः क्षमाचराः।
नीलग्रीवा शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः।
ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः।
ये भूतानामधिपतयो विशिखासः कपर्दिनः।
ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।
ये पथां पथिरक्षय ऐलबृदा यव्युधः।
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः।
य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे।
तेषाग्ं सहस्रयोजनेऽव धन्वानि तन्मसि॥

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि॥11॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात्॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु॥

तमुष्टुहि य स्स्विषु स्सुधन्वा यो विश्वस्य क्षयति भेषजस्य।
यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य॥

अयं मे हस्तो भगवानयं मे भगवत्तरः।
अयं मे विश्वभेषजोऽयग्ं शिवाभिमर्शनः॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे।
तान् यज्ञस्य मायया सर्वानव यजामहे।
मृत्यवे स्वाहा मृत्यवे स्वाहा॥
ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः।
तेनान्नेनाप्यायस्व॥
नमो रुद्राय विष्णवे मृत्युर्मे पाहि॥
ओं शान्ति श्शान्ति श्शान्तिः॥

॥चमकप्रश्नः॥

अग्नाविष्णू सजोषसेमा वर्धन्तु वाङ्गिरः। द्युम्नैर्वाजेभिरागतम्॥ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूग्ंषि च मे शरीराणि च मे॥[1]

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लुप्तं च मे क्लुप्तिश्च मे मतिश्च मे सुमतिश्च मे॥[2]

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥[3]

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे

नीवाराश्च मे॥[4]

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे॥[5]

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे॥[6]

अग्ंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाग्ंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे॥[7]

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे॥[8]

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे

शक्क्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तां ऋक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर् वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम्॥[9]

गर्भाश्च मे वथ्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट्च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवथ्सश्च मे त्रिवथ्सा च मे तुर्यवाट्च मे तुर्यौही च मे पष्ठवाट्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां अपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताग्ं श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां आत्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥[10]

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे पञ्चविग्ंशतिश्च मे सप्तविग्ंशतिश्च मे नवविग्ंशतिश्च म एकत्रिग्ंशच्च मे त्रयस्त्रिग्ंशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विग्ंशतिश्च मे चतुर्विग्ंशतिश्च मेऽष्टाविग्ंशतिश्च मे द्वात्रिग्ंशच्च मेऽषट्त्रिग्ंशच्च मे चत्वारिग्ंशच्च मे चतुश्चत्वारिग्ंशच्च मेऽष्टाचत्वारिग्ंशच्च मे वाजश्च प्रसवश्चाऽपिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायनश्चाऽन्त्यश्च भौवनश्च भुवनश्चाऽधिपतिश्च॥[11]

इडा देवहूर्मनुर्यज्ञनीर् बृहस्पतिरुक्थामदानि शग्ंसिषद्विश्वेदेवा स्सूक्तवाचः पृथिविमातर्मा मा हिग्ंसीर् मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासग्ं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु॥

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः। यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम। ब्रह्म प्रावादिष्म तन्नो मा हासीत्॥

ओं शान्ति श्शान्ति श्शान्तिः॥

॥रुद्र एकादशिनि आरति मन्त्रम्॥

After abhishekam with each ingredient, dhoopam, deepam, neivedyam and aarti are performed to Lord Shiva. One may have heard different verses being used for the aarti at various places. There are different traditions and it is important to remember that all of them are correct. In fact, one can make up a set of 11 different verses that they would like to use in praise of the Almighty during the aarti. The following section seeks to provide well known collections that are often used.

Set - 1

एष वै विभूर्नाम यज्ञः। सर्वग्ं ह वै तत्र विभु भवति।
यत्रैतेन यज्ञेन यजन्ते॥1॥

एष वै प्रभूर्नाम यज्ञः। सर्वग्ं ह वै तत्र प्रभु भवति।
यत्रैतेन यज्ञेन यजन्ते॥2॥

एष वा ऊर्जस्वान्नाम यज्ञः। सर्वग्ं ह वै तत्रोर्जस्वद्भवति।
यत्रैतेन यज्ञेन यजन्ते॥3॥

एष वै पयस्वान्नाम यज्ञः। सर्वग्ं ह वै तत्र पयस्वद्भवति।
यत्रैतेन यज्ञेन यजन्ते॥4॥

एष वै विधृतो नाम यज्ञः। सर्वग्ं ह वै तत्र विधृतं भवति।
यत्रैतेन यज्ञेन यजन्ते॥5॥

एष वै व्यावृत्तो नाम यज्ञः। सर्वग्ं ह वै तत्र व्यावृत्तं भवति।
यत्रैतेन यज्ञेन यजन्ते॥6॥

एष वै प्रतिष्ठितो नाम यज्ञः। सर्वग्ं ह वै तत्र प्रतिष्ठितं भवति।
यत्रैतेन यज्ञेन यजन्ते॥7॥

एष वै तेजस्वी नाम यज्ञः। सर्वग्ं ह वै तत्र तेजस्वि भवति।

यत्रैतेन यज्ञेन यजन्ते॥8॥

एष वै ब्रह्मवर्चसी नाम यज्ञः। आ ह वै तत्र ब्राह्मणो ब्रह्मवर्चसी जायते।
यत्रैतेन यज्ञेन यजन्ते॥9॥

एष वा अतिव्याधी नाम यज्ञः। आ ह वै तत्र राजन्योऽतिव्याधी जायते।
यत्रैतेन यज्ञेन यजन्ते॥10॥

एष वै दीर्घो नाम यज्ञः। दीर्घायुषो ह वै तत्र मनुष्या भवन्ति।
यत्रैतेन यज्ञेन यजन्ते॥11॥

एष वै क्लुप्तो नाम यज्ञः। कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः।
यत्रैतेन यज्ञेन यजन्ते॥12॥

ओं तन् महेशाय विद्महे वाग्विषूधाय धीमहि।
तन्न श्शिव प्रचोदयात्॥1॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवेभवे नातिभवे भवस्व माम्।
भवोद्भवाय नमः॥2॥

वामदेवाय नमो ज्येष्ठाय नमश्श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो
बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥3॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यस्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥4॥

तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥5॥

ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपति-र्ब्रह्मणोऽधिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥6॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे।
वोचेम शन्तमगं हृदे।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥7॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः॥8॥

कैलासशिखरे रम्ये शङ्करस्य शिवालये।
देवतास्तत्र मोदन्ते तन्मे मनः शिवसङ्कल्पमस्तु॥9॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः॥10॥

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः॥11॥

Set 3

पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्॥1॥

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥2॥

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्॥3॥

तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि। तन्नो नन्दिः प्रचोदयात्॥4॥

तत्पुरुषाय विद्महे महासेनाय धीमहि। तन्नष्षण्मुखः प्रचोदयात्॥5॥

तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि। तन्नो गरुडः प्रचोदयात्॥6॥

वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि। तन्नो ब्रह्म प्रचोदयात्॥7॥

नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥8॥

वज्रनखाय विद्महे तीक्ष्णदग्ग्ष्ट्राय धीमहि। तन्नो नारसिग्ंहः प्रचोदयात्॥9॥

भास्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नो आदित्यः प्रचोदयात्॥10॥

वैश्वानराय विद्महे लालीलाय धीमहि। तन्नो अग्निः प्रचोदयात्॥11॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्॥12॥

Set 4

प्रभ्राजमानीनाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥1॥

व्यवदातानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥2॥

वासुकिवैद्युतानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥3॥

रजतानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥4॥

परुषाणाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥5॥

श्यामानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥6॥

कपिलानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥7॥

अतिलोहितानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥8॥

ऊर्ध्वानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥9॥

अवपतन्तानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥10॥

वैद्युतानाग्ं रुद्राणाग् स्थाने स्वतेजसा भानि॥11॥

Set 5

अग्निर्मे वाचि श्रितः। वाग्घृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥1॥

वायुर्मे प्राणे श्रितः। प्राणो हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥2॥

सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥3॥

चन्द्रमा मे मनसि श्रितः। मनो हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥4॥

दिशो मे श्रोत्रे श्रिताः। श्रोत्रग्ं हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥5॥

आपो मे रेतसि श्रिताः। रेतो हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥6॥

पृथिवी मे शरीरे श्रिता। शरीरग्ं हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥7॥

ओषधिवनस्पतयो मे लोमसु श्रिताः।

लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥8॥

इन्द्रो मे बले श्रितः। बलग्ं हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥9॥

पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥10॥

ईशानो मे मन्यौ श्रितः। मन्युर्हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥11॥

आत्मा म आत्मनि श्रितः। आत्मा हृदये।
हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥12॥

॥लिङ्गाष्टकम्॥

ब्रह्ममुरारि सुरार्चित लिङ्गं, निर्मलभासित शोभित लिङ्गम्।
जन्मज दुःख विनाशक लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

देवमुनि प्रवरार्चित लिङ्गं, कामदहन करुणाकर लिङ्गम्।
रावणदर्प विनाशन लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

सर्व सुगंध सुलेपित लिङ्गं, बुद्धि विवर्दन कारण लिङ्गम्।
सिद्ध सुरासुर वन्दित लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

कनन महामणि भूषित लिङ्गं, फणिपति वेष्टित शोभित लिङ्गम्।
दक्षसुयज्ञ विनाशन लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

कुंकुम चन्दन लेपित लिङ्गं, पङ्कजहार सुशोभित लिङ्गम्।
सञ्चित पाप विनाशन लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

देवगणार्चित सेवित लिङ्गं, भावैर् भक्तिभिरेव च लिङ्गम्।
दिनकरकोटि प्रभाकर लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

अष्टदळोपरिवेष्टित लिङ्गं, सर्वसमुद्भव कारण लिङ्गम्।
अष्टदरिद्र विनाशन लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

सुरगुरु सुरवर पूजित लिङ्गं, सुरवन पुष्प सदार्चित लिङ्गम्।
परमपतिं परमात्मक लिङ्गं, तत् प्रणमामि सदा शिवलिङ्गम्॥

लिङ्गाष्टक मिदं पुण्यं, यः पठेत् शिवसन्निधौ।
शिवलोकमवाप्नोति, शिवेन सह मोदते॥

॥भाग्य सूक्तम्॥

प्रातरग्निं प्रातरिन्द्रग्ं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिम् प्रात स्सोममुत रुद्रग्ं हुवेम॥

प्रातर्जितं भगमुग्रग्ं हुवेम वयं पुत्र–मदितेर्यो विधर्ता।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह॥

भग प्रणेत–र्भग सत्यराधो भगेमां धियमुदवददन्नः।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभि–र्नृवन्त स्स्याम॥

उतेदानीं भगवन्त स्स्याम उत प्रपित्व उत मध्ये अह्नाम्।
उतोदिता मघवन् सूर्यस्य वयं देवानाग्ं सुमतौ स्याम॥

भग एव भगवाग्ं अस्तु देवा स्तेन वयं भगवन्त स्स्याम।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुर एता भवेह॥

समध्वरायोषसो ऽनमन्त दधिक्रावेव शुचये पदाय।
अर्वाचीनं वसुविदं भगन्नो रथमिवाश्वा वाजिन आ वहन्तु॥

अश्वावती–र्गोमती–र्नउषासो वीरवती स्सद–मुच्छन्तु भद्राः।
घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभि स्सदा नः॥

यो माऽग्ने भागिनग्ं सन्त-मथाभागं चिकीऋषति।
अभागमग्ने तं कुरु मामग्ने भागिनं कुरु॥

॥कलश आवाहनम्॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः।
सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः॥

नाके सुपर्ण–मुयत्पतन्तं हृदा वेनन्तो अभ्यचक्षतत्वा।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्॥

आप्यायस्य समेतु ते विश्वतः सोम वृष्णियम्।
भवा वाजस्य संगथे॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु
यो रुद्रो विश्वा भुवनाऽऽविवेश
तस्मै रुद्राय नमो अस्तु॥
(अप उपस्पृश्य)॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पाग्ंसुरे।

इन्द्रं विश्वा अवीवृध–न्त्समुद्रव्यच–संगिरः।
रथीतमग्ं रथीनां वाजानाग्ं सत्पतिं पतिम्।

आपो वा इदग्ंसर्वं विश्वा-भूतान्यापः प्राणा वा आपः
पशव आपोऽन्नमापोऽमृतमाप स्सम्राडापो विराडाप
स्स्वराडाप श्छन्दाग्स्यापो ज्योतीग्ष्यापो
यजूग्ष्याप स्सत्यमाप स्सर्वा देवता आपो
भूर्भुवसुवराप ओम्।

अपः प्रणयति। श्रद्धा वा आपः।
श्रद्धामेवारभ्य प्रणीय प्रचरति।

अपः प्रणयति। यज्ञो वा आपः।
यज्ञमेवारभ्य प्रणीय प्रचरति।

अपः प्रणयति। वज्रो वा आपः।
वज्रमेवारभ्य भ्रातृव्येभ्यः प्रहृत्य प्रणीय प्रचरति।

अपः प्रणयति। आपो वै रक्षोघ्नीः।
रक्षसामपहत्यै। अपः प्रणयति।

आपो वै देवानां प्रियं धाम। देवानामेव प्रियं धाम प्रणीय प्रचरति।
अपः प्रणयति। आपो वै सर्वादेवताः।

देवता एवारभ्य प्रणीय प्रचरति। अपः प्रणयति।
आपो वै शान्ताः। शान्ताभिरेवास्य शुचग्ं शमयति।

देवो वः सवितोत्पुना–त्वच्छिद्रेण पवित्रेण वसोसूर्यस्य रश्मिभिः॥

कूर्चाग्रे राक्षसान् घोरान् छिन्धि कर्मविघातिनः।
त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि।

वृक्षराज–समुद्भूताः शाखायाः पल्लवत्वचः।
युष्मान् कुम्भेष्वर्पयामि सर्वपापापनुत्तये।

नाळिकेर–समुद्भूत त्रिणेत्र हरसत्तम।
शिखया दुरित सर्वं पापं पीडां च मे नुद।

स हि रत्नानि दाशुषे सुवाति सविता भगः। तं भागं चित्रमीमहे॥

॥प्रार्थना॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥

कुक्षौ तु सागराः सर्वे सप्तदीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥

अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः।

अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥

गङ्गे च यमुने चैव गोदावरी सरस्वति।
नर्मदे सिन्धु कावेरी जलेऽस्मिन् सन्निधिं कुरु॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमग्ं सचता परुष्णिया।
असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये श्रृणुह्या सुषोमया॥

सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः॥

॥वरुण पूजा॥

इमं मे वरुण श्रुधी हवमध्या च मृडय।
त्वामवस्युराचके॥

तत्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमनो हविर्भिः।
अहेडमनो वरुणेह बोध्युरुशग्ंस मा न आयुः प्रमोषीः॥

अस्मिन् कुम्भे सकलतीर्थानां अधिपतिं वरुणं ध्यायामि। वरुणं आवाहयामि॥

ओं वरुणाय नमः। आसनं समर्पयमि॥

ओं वरुणाय नमः। पादयोः पाद्यं समर्पयामि॥

ओं वरुणाय नमः। अर्घ्यं समर्पयामि॥

ओं वरुणाय नमः। आचमनीयं समर्पयामि॥

ओं वरुणाय नमः। स्नपयामि। स्नानान्तरं आचमनीयं समर्पयामि॥

ओं वरुणाय नमः। वस्त्रोत्तरीयं समर्पयामि॥

ओं वरुणाय नमः। यज्ञोपवीताभरणानि समर्पयामि॥

ओं वरुणाय नमः। दिव्य–परिमळ–गन्धान् समर्पयामि। गन्धस्योपरि अक्षतान् समर्पयामि॥

ओं वरुणाय नमः। पुष्पैः पूजयामि॥

॥अर्चन नामावळि॥

ओं वरुणाय नमः।

ओं प्रचेतसे नमः।

ओं सुरूपिणे नमः।

ओं अपांपतये नमः।

ओं मकरवाहनाय नमः।

ओं पाशहस्ताय नमः।

ओं तीर्थराजाय नमः।

ओं जलाधिपतये नमः।

ओं पश्चिमादिपतये नमः।

ओं मेघादिपतये नमः।

ओं अनर्घमणिभूषणाय नमः।

ओं श्वेतछत्रधराय नमः।

ओं समुद्रराजाय नमः।

ओं ऋष्यशृङ्गाय नमः।

ओं वरुणाय नमः।

ओं वरुणाय नमः। धूपमाघ्रापयामि॥

ओं वरुणाय नमः। दीपं दर्शयामि। धूपदीपानन्तरं आचमनीयं समर्पयामि॥

ओं वरुणाय नमः। नैवेद्यं निवेदयामि। मध्ये मध्ये अमृतपानीयं समर्पयामि॥

ओं वरुणाय नमः। तांबूलं समर्पयामि॥

॥पुण्याहवाचन जपम्॥

दधिक्राव्ण्णो अकारिषम्। जिष्णो रश्वस्य वाजिनः।
सुरभिनो मुखा करत्। प्रण आयूग्ंषि तारिषत्॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।
महे रणाय चक्षसे॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः॥

तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः॥

ओं शान्ति श्शान्ति श्शान्तिः॥

--*--